इयम् आकाशवाणी

सम्प्रति: वार्ताः श्रूयन्ताम्

दिनाङ्कः-27/04/2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् कश्मीरे पहलगाम - आतंकि - आक्रमणकारिणः षड्यन्त्रकारिणश्च दण्डयिष्यन्ते, प्रभावितेभ्य: परिवारेभ्यः न्यायाश्वासनम् प्रदत्तम्।
- आकाशवाणी-मन-की-बात-कार्यक्रमे प्रधानमन्त्रिणोक्तं यत् आक्रमणमिदं आतङ्कवादस्य निष्ठुरतां प्रदर्शयति।
- श्री मोदिनोक्तं यत् जगत्यां संकटसमये सहायतां प्रदातुं भारत देशः सदैव तत्परः।
- राष्ट्रियान्वेषण अभिकरणेन पहलगाम आतङ्कि आक्रमण प्रकरणे प्रमाणानां अन्वेषणं प्रारब्धम्।
- ईरान पोतस्थात्रे भीषण विस्फोटे मृतकानां संख्या विवर्ध्य पञ्चविंशतिः सञ्जाता, अष्टाशताधिकाश्च व्रणिताः।

6. आई पी एल क्रिकेट शृङ्खलायां दिल्ली कैपिटल्स दलं रॉयल चैलेंजर्स बैंगलूरु दलेन समं स्पर्धिष्यते।

<u>अथ वार्ताः विस्तरेण</u>

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना पहलगाम-आतंकि-आक्रमणकारिभ्य:, षडयन्त्रकारिभ्यश्च कठोरतमं प्रत्युत्तरं प्रदास्यति । आकाशवाणीतः मन-की- बात -कार्यक्रमे श्री मोदिनोक्तं यत् आक्रमणमिदं आतंकवादस्य निष्ठुरतां प्रदर्शयति ।

बाइट- पीएम पहलगाम अटैक - 29 से.

प्रधानमन्त्रिणा भणितं यत् आतंकवादं विरूद्धय सम्पूर्ण देश: ऐक्यभावेन समक्षं समायाति। श्रीमोदिनोक्तं यत् आतंकि आक्रमणानन्तरं अशेष-जगत: संवदेशील-सन्देशा: प्राप्यन्ते।

बाइट- पीएम मोदी ऑन वर्ल्ड लीडर - 31 से.

श्रीमोदिना प्रकरणेऽस्मिन् प्रसन्नताभिव्यक्ता यत् अप्रैलमासेऽस्मिन् आर्यभट्ट-उपग्रह- प्रक्षेपणस्य पञ्चाशत्-वर्षाणि प्रपूरितानि। तेन प्रतिपादितं यत् अधुना भारतदेश: वैश्विक-अन्तरिक्ष-महाशक्तिः रूपेण सशक्तो जातः। विगत-मासे म्यांमां-नगरे दुरापन्नस्य भूकम्पस्य उल्लेखं कुर्वन् प्रधानमन्त्री भवितवान् यत् भारतदेशेन साहाय्योद्धार-कार्याणां कृते सपदि एव 'ऑपरेशन-बह्मा' इति अभियानं प्रारब्धम्। तेन भणितं यत् वायु-सैन्य- विमान- नौसैन्य पोतै: च प्रतिवेशि-देशेभ्यः सर्वसंभवोपाया: विहिताः। श्रीमोदिना अभियानावधौ पीडितानां सहायतार्थं भारतीय साहाय्योद्धार - दलस्य आभार: प्रकटित:। तेन प्रकाशितं यत् कस्यामपि प्राकृतिक-आपदां अपाकर्तुं जागऽरुकता महती आवश्यकी वर्तते । प्रधानमन्त्रिणा प्रकटितं यत् वर्षेऽस्मिन् मई मासस्य दशम्यां तारिकायां प्रथम-स्वतन्त्रता-संघर्षस्य वार्षिकी परिपालयिष्यते।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

एनआईए-पहलगाम-आक्रमणम्

गृहमन्त्रालयस्य आदेशानन्तरं राष्ट्रियान्वेषण-अभिकरणेन पहलगाम आतङ्क्याक्रमण-प्रकरणस्य औपचारिकरूपेण कार्यभारग्रहणस्य प्रक्रिया समारब्धा। बुधवासरात् आरभ्य आतङ्कवादीनां आक्रमणस्थले एनआईए-दलेन प्रमाणानाम् अन्वेषणं तीव्रं कृतम् अस्ति। एनआईए इत्यनेन एकस्मिन् वक्तव्ये उक्तं यत् आतङ्कवादविरोधीसंस्थायाः चतुर्णाम् अधिकारिणां एकं दलं प्रत्यक्षदर्शिभिः सह वार्तालापं कुर्वन्ति। ये बैसरन उपत्यकायां आक्रमणं प्रत्यक्षतया दृष्टवन्तः। आतङ्कवादिनः कार्यप्रणाल्याः प्रमाणं प्राप्तुं एनआईए-दलं प्रवेश-निर्गमन-स्थानयोः परीक्षणं करोति ।

इरान-विस्फोटः

दक्षिण-ईरानस्य बन्दर-अब्बास-नगरे शाहिद-राजाई-पत्तने ह्यः विशाल-विस्फोटे अधुना यावत् पञ्चविंशतिः जनाः मृत्युमुपगताः, अष्ट-शततोप्यधिकाः जनाः व्रणिताः। स्थानीय-वार्ता-वाहिन्यानुसारं विस्फोटः शाहिद-राजाई-पत्तने संगृहीतेषु अनेकेषु कंटेनर इति संग्रह-पात्रेषु अभवत्। ओमानदेशे इरान्-अमेरिका-देशयोः मध्ये परमाणुवार्तायाः तृतीयचक्रस्य आरम्भे एषः विस्फोटः अभवत् । राष्ट्रपतिः मसूद पेजेशकियनः, सामाजिकान्तर्जालीये सन्देशे पीडितानां प्रति दुःखं सहानुभूतिञ्च प्रकटितवान्, घटनायाः कारणानां अन्वेषणार्थं आदेशं च प्रसारितवान्।

जम्मू-कश्मीर विधानसभा-सत्रम्

जम्मू-कश्मीर मन्त्रिमण्डलस्य अनुमत्या राज्यपालेन मनोज - सिन्हा वर्येण श्वः पहलगाम आतंकि- आक्रमणमालक्ष्य एक-दिवसीय - विशिष्ट-सत्रं समाहूतम्। आक्रमणेस्मिन् पञ्चविंशतिः पर्यटकाः, स्थानीय नागरिकाः, अन्ये बहवश्च व्रणिताः। मन्त्रिमण्डलेन अप्रैल त्रयोविंश्यां जम्मू-कश्मीरस्य मुख्यमन्त्रिणा उमर अब्दुल्ला वर्यस्य अध्यक्षतायां निर्णयोऽयं विहितः। चर्चायाम् अप्रैल अष्टाविंशतिः दिनांके विशिष्टं सत्रं आह्वानस्य निर्णयो ग्रहीतः। इदं प्रथम-वारं विद्यते यत् विधानसभायाः आय-व्यय-प्रस्तुतिकरणस्य सत्रं मध्ये एवं विहाय इदं आक्रमण-सम्भाषण-सम्बद्ध-विशिष्ट-सत्रं विधीयते।

## जम्मू कश्मीर यातायातम्

जम्मू-कश्मीरे जम्मू-श्रीनगर-राष्ट्रीय राजमार्गः अद्य प्रातः कालादाराभ्य जीर्णोद्धार-कार्याणि आलक्ष्य पिहितः। रामबन-जनपदे भू-स्खलन-घटनान् समालक्ष्य, निर्णयोऽयं ग्रहीतः। तत्र उपायुक्त-महोदयस्य आदेशानन्तरं राजमार्गोऽयं स्थगितः। अद्य प्रातः अष्ट-वादनतः श्वः प्रातः अष्टवादन -पर्यन्तं सर्वविध-यातायाताय राजमार्गोऽयं पिहितः।

## भारतीय ऋतु-विभागः

ऋतु-विभागेन दिल्ली-हरियाणा-पंजाब-राजस्थान-उत्तर प्रदेश-पश्चिम- मध्यप्रदेशेषु च आगामिषु त्रि - दिवसेषु ऊष्ण - ताप-तरंगाणां प्रसृण - अनुमानः अभिव्यक्तः । विभागेन सन्दर्भेऽस्मिन् प्रकाशितं यत् पञ्जाब- हरियाणा-दिल्ली-राजस्थानेषु च श्वः यावत् अधिकतम -तापमाने कोऽपि परिवर्तनं नैव भविष्यति। विभागेन-असम-मेघालय-सिक्किम-अरूणाचलप्रदेश, नगालैंड- मणिपुर - राजस्थान, विदर्भ-छत्तीसगढ, कर्नाटकेषु भीषण - वृष्टेः अनुमानोऽपि प्रकटितः।

## इटलीदेशस्य मृत्युः -

इटलीदेशे गतसायं सिसिलीक्षेत्रस्य राजधान्यां पलेर्मोनगरे गतसायं गुलिकाकाण्डे न्यूनातिन्यूनं द्वौ जनौ मृतौ, अन्ये त्रयः गम्भीररूपेण व्रणिताः।वार्ता वाहिन्यानुसारं व्यस्त-तमस्य डुओमो डि मोनरेले-स्वायर इत्यस्य समीपे पिज्जेरिया इत्यत्र यूनां समूह-द्वयोः मध्ये विवादेन एषा घटना आरब्धा, ततः गुलिकाकाण्डरूपेण परिवर्तितम् ।

## क्रिकेट् जगति -

आईपीएल - क्रिकेट् - श्रृंखलायां मुम्बय्यां अद्य मुम्बई- इंडियंस, लखनऊ-सुपर-जायंट्स- देलयो: मध्ये साम्मुख्यं भविष्यति। दिल्ल्यां द्वितीयायां क्रीडायां सार्ध -सप्त-वादनत: डेल्ही कैपिटल्स दलं रॉयल- चैलेंजर्स बैंगलुरू दलेन सह स्पर्धिष्यते ।

।। इति वार्ता: ।।